National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 64-67
© 2026 NJHSR
www.sanskritarticle.com

**रफिक होसेन**
शोधार्थी ,
यादवपुरविश्वविद्यालय:

.

**Correspondence:**
**रफिक होसेन**
शोधार्थी ,
यादवपुरविश्वविद्यालय:

# दर्पणप्रदीपटीकयोः मम्मटोक्तकाव्यकारणमविमर्शः

**रफिक होसेन**

**सारसंक्षेपः**
मम्मटाचार्यमते काव्योत्पत्तेर्मूलकारणानि त्रीणि—शक्तिः, निपुणता अभ्यासश्च। शक्तिः कवित्वस्य बीजरूपः संस्कारविशेषः; लोकशास्त्रकाव्यादीनामवलोकनेन निपुणता व्युत्पत्तिर्वा जायते; काव्यज्ञस्य शिक्षामनुसृत्य पुनः पुनः काव्यरचनायां प्रवृत्तिरभ्यास इति कथ्यते। विश्वनाथः शक्तिं संस्कारविशेषरूपेण व्याचक्षाणः लोकशास्त्रकाव्यादिज्ञानस्य करणयोजनायाश्च स्वरूपं विशदयति। गोविन्दठक्कुरः शक्तिं प्रतिभारूपेण निर्दिश्य तस्याः कारणत्वं, व्युत्पत्तेरभ्यासस्य च परस्परसम्बन्धं तथा त्रयाणामपि समन्वितं कारणत्वं विशदतया प्रतिपादयति। अत एव उभावपि टीकाकारौ मम्मटस्य त्रितयकारणतत्त्वमनुसृत्यापि तयोर्व्याख्याने शक्तेः, व्युत्पत्तेः, अभ्यासस्य च स्वरूपं परस्परसम्बन्धश्च विभिन्नैः पक्षैः अधिकं स्पष्टतया प्रकाश्यते।

**कुञ्चिकाशब्दः**
काव्यकारणम्, शक्तिः, प्रतिभा, निपुणता, व्युत्पत्तिः, अभ्यासः, काव्यज्ञशिक्षा, काव्योत्पत्तिः, काव्यप्रकाशः, काव्यप्रकाशदर्पणम्, काव्यप्रदीपः।

**प्रस्तावना**
कारणं विना न किञ्चिदपि कार्यं सम्भवति। जगतः प्रत्येकस्य कार्यस्य पृष्ठतः कश्चिद् वा कारणविशेषोऽवश्यं वर्तते। यथा घटरूपकार्यस्य दण्डचक्रादीनि कारणानि अपेक्ष्यन्ते, तथैव काव्यरूपस्य कार्यस्यापि निश्चितानि कारणानि सन्ति। संस्कृतालङ्कारशास्त्रे काव्यस्वरूपस्य, आत्मनः, गुणदोषालङ्काराणां च चर्चया सह काव्योत्पत्तेः कारणमपि विस्तरेण विवेचितम्। कवेरन्तःस्थितया यया विशेषशक्त्या काव्यरचनासामर्थ्यं स्फुरति, तस्याः शक्तेः व्युत्पत्त्या अभ्यासेन च सम्बन्धोऽपि विभिन्नैः आचार्यैः प्रतिपादितः।

काव्योत्पत्तेः कारणविषये प्राचीनालङ्कारिकानां मध्ये मुख्यतः द्वे प्रवृत्ती दृश्येते। केचन प्रतिभामेव काव्यस्य प्रधानकारणमथवा एकमात्रकारणं मन्यन्ते, अपरैस्तु प्रतिभा-व्युत्पत्ति-अभ्यासानां समन्वयः काव्योत्पत्तेः कारणत्वेन स्वीकृतः। आचार्यभामहः प्रतिभायाः महत्त्वं प्रतिपादयन् आह—काव्यं तु जायते जातु कस्यचित् प्रतिभावतः।[१] अनन्तरं स शब्दार्थयोर्ज्ञानं काव्यविदां सेवां पूर्वप्रणीतकाव्यावलोकनं च काव्यरचनायाः सहायकानि कारणानि मन्यते। आचार्यो दण्ड्यपि नैसर्गिकीं प्रतिभां, बहुनिर्मलं श्रुतं, अमन्दश्चाभियोगं काव्यसम्पदः कारणत्वेन निर्दिशति—

**नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम्।**
**अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥**[२]

वामनः[३] प्रतिभां कवित्वस्य बीजरूपं संस्कारविशेषं मन्यते, रुद्रटश्च[४] शक्तिव्युत्पत्त्यभ्यासान् काव्यकारणत्वेन स्वीकरोति।

अपरतः राजशेखर-वाग्भट-हेमचन्द्र-जगन्नाथादीनामलङ्कारिकानां मतेन प्रतिभायाः प्राधान्यं विशेषतः दृश्यते। राजशेखरः शक्तिं काव्यसृष्टेर्मूलकारणं मन्यते तथा प्रतिभाव्युत्पत्त्योः सम्बन्धं निरूप्य प्रतिभां कारयित्रीं भावयित्रीञ्च द्विविधां निर्दिशति। वाग्भटोऽपि प्रतिभामेव कवीनां काव्यकरणस्य कारणं स्वीकरोति तथा व्युत्पत्तिमभ्यासञ्च तस्याः संस्कारकत्वेन निर्दिशति।

एवम् संस्कृतालङ्कारशास्त्रे काव्यकारणविषये प्रतिभाप्राधान्यं तथा प्रतिभा-व्युत्पत्ति-अभ्यासानां समन्वितं कारणत्वमिति द्वे प्रवृत्ती भवतः।

एवं पूर्वाचार्यपरम्परायामाचार्यः मम्मटः काव्योत्पत्तेः कारणत्वेन शक्तिं निपुणतामभ्यासञ्च समन्वितरूपेण स्वीकरोति। *काव्यप्रकाशस्य* तृतीयकारिकायां स कथयति—

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥**[५]

अत्र 'शक्तिः' इति पदेन 'कवित्वबीजरूपः संस्कारविशेषः'[६] उच्यते। लोकशास्त्रकाव्यादीनामवलोकनाद् या निपुणता व्युत्पत्तिर्वा जायते, काव्यज्ञस्य शिक्षामनुसृत्य करणयोजनादिषु पुनः पुनः प्रवृत्तिश्चाभ्यास इति कथ्यते। विशेषतः मम्मटेन एते त्रयः पृथक् पृथक् न, अपि तु समुचितरूपेण काव्योत्पत्तेः कारणत्वेन स्वीकृताः। तस्य वृत्तावपि स्पष्टमुक्तम्—'त्रयः समुदिताः, न तु व्यस्ताः'।[७] अतः मम्मटस्य काव्यकारणतत्त्वे शक्तिर्निपुणताभ्यासाश्च परस्परापेक्षया काव्योत्पत्तौ प्रवर्तन्ते।

मम्मटस्यैतत् संक्षिप्तप्रतिपादनं *काव्यप्रकाशदर्पणे* तथा *काव्यप्रदीपे* विस्तरेण विवेचितम्। विश्वनाथः शक्तिं संस्कारविशेषरूपेण व्याचक्षाणः तस्याः स्वरूपं परिधिं च विशदयति तथा लोकशास्त्रकाव्यादीनामवलोकनेन काव्यकारस्य निपुणताप्राप्तिं स्पष्टयति। गोविन्दठक्कुरस्तु शक्तिं 'कवित्वबीजभूतो देवताप्रसादा-दिजन्मा संस्कारविशेषः प्रतिभाव्यपदेशः' इति व्याचष्टे, येन शक्तेः प्रतिभया सह साक्षात् सम्बन्धः प्रतिपाद्यते। स शक्तेः कारणत्वं, व्युत्पत्तेर्जननं, काव्यज्ञशिक्षया अभ्यासस्य विकाशञ्च विशदतया निरूपयति। मम्मटोक्तानां त्रयाणामपि कारणानां परस्परसापेक्षं समन्वितं कारणत्वमपि *काव्यप्रदीपे* विशेषतया विवेचितम्।

अतः मम्मटोक्तं काव्यकारणतत्त्वं केवलं त्रयाणां कारणानां नामनिर्देशे न पर्यवस्यति; अपि तु कविप्रतिभायाः, शास्त्रीयलोकज्ञानस्य, काव्यरचनायाः पुनः पुनरभ्यासस्य च सुसम्बद्धः सम्बन्धः तत्र निहितोऽस्ति। एतेषां कारणानां स्वरूपं, परस्परसम्बन्धः, काव्योत्पत्तौ तेषां भूमिका च *काव्यप्रकाशदर्पणे काव्यप्रदीपे* च विभिन्नैः पक्षैः स्पष्टतया प्रतिपादिता। अतः अस्मिन् प्रबन्धे "दर्पणप्रदीपटीकयोः मम्मटोक्तकाव्यकारणम् : एका समीक्षा" इति विषये मम्मटोक्तयोः शक्तेः, निपुणतायाः, अभ्यासस्य च स्वरूपं निरूप्य विश्वनाथ-गोविन्दठक्कुरयोर्व्याख्यानयोस्तुलनात्मकं विवेचनं प्रस्तूयते।

**शक्तिः**

मम्मटोक्तेषु काव्योत्पत्तेस्त्रिषु कारणेषु 'शक्तिः' प्रथमम्। 'शक्तिः' इति शब्दः 'शक्'धातोः 'क्तिन्'प्रत्ययेन निष्पन्नः। झालकीकरः *बालबोधिन्यां* कथयति—'शक्नोति पुमान् काव्यनिर्माणायास्वादना-यानुभवाय चानया इति शक्तिः'।[८] अर्थात् यया काव्यनिर्माणे, काव्यास्वादने, तदनुभवे च सामर्थ्यं लभ्यते सा शक्तिः। किन्तु मम्मटस्य मते शक्तेः मुख्यं स्वरूपं 'शक्तिः कवित्वबीजरूपः संस्कारविशेषः' इति। अतः कवित्वस्य बीजरूपः संस्कारविशेष एव शक्तिः। अस्याः अभावे काव्यस्य सम्यगभिव्यक्तिर्न भवति। मम्मटः स्पष्टमाह—'यां विना काव्यं न प्रसरते, प्रसृतं वोपहसनीयं स्यात्'।[९]

मम्मटस्य 'संस्कारविशेष' इत्यस्य व्याख्यायां *काव्यप्रकाशदर्पण*कारः विश्वनाथः कथयति—'संस्क्रियते शिष्टकार्यभाजनं क्रियते प्रमाणेनेति संस्कारः'।[१०] ततः विशेषशब्दस्य व्याख्यायां स आह—'प्राचीना वासना देवताद्यनुग्रहजनितः कश्चनातिविशिष्टो वास एव विशिष्यत इति विशेषः'।[११] अन्ते 'स एव च शक्तिः शक्नोत्यनया इति व्युत्पत्त्या' इति स्पष्टयति। एवं विश्वनाथस्य विवेचने शक्तेः संस्कारात्मकं स्वरूपं, पूर्ववासनासम्बन्धश्च विशेषतया प्रकाश्येते।

गोविन्दठक्कुरस्तु *काव्यप्रदीपे* शक्तिं प्रतिभया स्पष्टतया सम्बध्नाति—'शक्तिः कवित्वबीजभूतो देवताप्रसादादिजन्मा संस्कारविशेषः प्रतिभाव्यपदेशः'।[१२] अर्थात् शक्तिः कवित्वबीजरूपः संस्कारविशेषः, या प्रतिभा इति कथ्यते। 'प्रतिभाव्यपदेशः' इति पदेन स शक्तेः प्रतिभारूपतां विशदयति। पुनश्च 'यां विना काव्यं न प्रसरते' इति मम्मटवचनमवलम्ब्य शक्तेः विशेषकारणत्वं प्रतिपादयति। तन्मते प्रतिभायाः काव्यप्रसरणस्य च 'अन्वयव्यतिरेकी' सम्बन्धोऽस्ति; प्रतिभायां सत्यां काव्यप्रसरो भवति, तदभावे च न भवति।

एवं तुलनात्मकदृष्ट्या विश्वनाथस्य विवेचने शक्तेः संस्कारात्मकं स्वरूपं, पूर्ववासनासम्बन्धश्च प्रमुखः; गोविन्दठक्कुरस्य तु प्रतिभारूपता, देवताप्रसादादिजन्मत्वं, कारणत्वञ्च विशेषतया प्रतिपादितम्। तथापि उभावपि टीकाकारौ मम्मटस्य मूलाभिप्रायमनुसृतवन्तौ। मम्मटस्य 'कवित्वबीजरूपः संस्कारविशेषः' इति, विश्वनाथस्य 'स एव च शक्तिः' इति, गोविन्दठक्कुरस्य 'कवित्वबीजभूतः संस्कारविशेषः' इति च वचनानि परस्परं संगच्छन्ते। अतः शक्तिः कवित्वस्य बीजरूपा, काव्योत्पत्तेः प्रथममपरिहार्यञ्च कारणमिति सिद्धम्।

**निपुणता**

मम्मटोक्तकाव्योत्पत्तेस्त्रिषु कारणेषु 'निपुणता' इति द्वितीयं कारणम्। मम्मटः कारिकायामाह—'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवे-क्षणात्'।[१३] अत्र लोकशास्त्रकाव्यादीनामवलोकनविमर्शनाभ्यां या विशेषा व्युत्पत्तिः कौशलं वा जायते, सा निपुणता। स स्ववृत्तौ कथयति—'लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य। शास्त्राणां छन्दोव्याकरणाभिधानकोश-कलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानाम्। काव्यानां च महाकवि-सम्बन्धिनाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः'।[१४] अर्थात् स्थावरजङ्गमात्मकस्य लोकस्य, विविधशास्त्राणां, महाकवीनां काव्यानां, इतिहासादिग्रन्थानां च परिशीलनाद् या व्युत्पत्तिर्जायते, सा निपुणता। अतः निपुणता न केवलं कस्यचिदेकस्य

शास्त्रस्य ज्ञानम्, अपि तु विविधज्ञानसम्पादनजनितं काव्यरचना-कौशलम्।

अत्र केवलं सामान्यज्ञानं पर्याप्तं न भवति; अपि तु लोकस्य, शास्त्रस्य, काव्यस्य च सम्यगवलोकनं, विमर्शनं, परिशीलनञ्च अपेक्ष्यन्ते। लोकशब्देन स्थावरजङ्गमात्मकस्य जगतः स्वभावो वृत्तिश्च गृह्येते। शास्त्रशब्देन छन्दोव्याकरणाभिधानकोशकलादयः विविधविषयाः, काव्यशब्देन महाकवीनां काव्यानि, 'आदि'शब्देन इतिहासादयोऽपि गृह्यन्ते। एवं निपुणता कवेः ज्ञानसम्पदं विस्तारयित्वा तस्य प्रयोगसामर्थ्यमपि वर्धयति।

*काव्यप्रकाशदर्पणे* विश्वनाथः 'इतिहासादीनाम्' इत्यस्य व्याख्यायां कथयति—'इतिहासादीनामिति आदिशब्देन निखिलवाक्प्रपञ्च-परिग्रहः'।[१५] अनेन स मम्मटेन निर्दिष्टस्य ज्ञानक्षेत्रस्य व्यापकतां प्रकाशयति। अस्य समर्थनार्थं स कथयति—

**न स शब्दो न तद्वाक्यं न सा विद्या न सा कला।**
**जायते यन्न काव्याङ्गमहो भावो गुरुः कविः॥**[१६]

अर्थात् न कश्चित् शब्दः, न किञ्चिद् वाक्यं, न कापि विद्या, नापि कला काव्यस्याङ्गत्वात् बहिर्भूता। अतः विश्वनाथस्य विवेचने निपुणतायाः मुख्यविशेषता तस्याः विस्तीर्णं ज्ञानक्षेत्रम्।

गोविन्दठक्कुरः *काव्यप्रदीपे* लोक-शब्दं व्याचष्टे—'स्थावरजङ्ग-मात्मकलोकस्य वृत्तम्', 'शास्त्रम्' इत्यस्य च 'शास्त्रं छन्दःशास्त्रादि' इति। काव्यशब्देन महाकवीनां काव्यानि, आदिशब्देन इतिहासादयो गृह्यन्ते। ततः स स्पष्टयति—'तेषां विमर्शनाद् व्युत्पत्तिर्निपुणता'।[१७] अर्थात् एतेषां विमर्शनाद् या व्युत्पत्तिर्जायते, सा निपुणता। अत्र मम्मटस्य 'अवेक्षणान्निपुणता' इत्यनेन गोविन्दठक्कुरस्य 'विमर्शनाद् व्युत्पत्तिर्निपुणता' इत्यस्य साक्षात् साम्यं दृश्यते। मम्मटः अवलोकनं निर्दिशति, गोविन्दठक्कुरस्तु तस्य फलरूपेण व्युत्पत्तिं प्रतिपादयति।

विश्वनाथगोविन्दठक्कुरयोर्व्याख्यानयोस्तुलनायां भेदः स्पष्टः। विश्वनाथस्य विवेचने आदिशब्देन निपुणतायाः ज्ञानपरिसरः निखिलवाक्प्रपञ्चपर्यन्तं विस्तारितः; गोविन्दठक्कुरस्तु लोकशास्त्र-काव्यादीनां विमर्शनाद् व्युत्पत्तेर्जननसम्बन्धं विशेषतया प्रकाशयति। तथापि उभावपि मम्मटस्य मूलाभिप्रायमनुसृतवान्। मम्मटस्य समग्रकारणतत्त्वे निपुणता स्वतन्त्रकारणं न, किन्तु शक्त्यभ्यासाभ्यां सह समन्वितं कारणम्। अतः 'त्रयः समुदिताः, न तु व्यस्ताः' इति वचनानुसारं शक्तेः सृजनसामर्थ्यं निपुणतया परिष्कृतं भवति, अभ्यासेन च तत् प्रयोगे परिणमति। एवं निपुणता काव्योत्पत्तेः आवश्यकं ज्ञानात्मकं कौशलरूपं कारणमिति सिद्धम्।

**अभ्यासः**

मम्मटाचार्यः काव्योत्पत्तेस्तृतीयं कारणम् 'अभ्यासः' इति निर्दिशति—'काव्यज्ञशिक्षयाभ्यासः'।[१८] अभ्यासः कस्यचन कार्यस्य पुनः पुनः सम्पादनं निरन्तरं च शीलनम्। किन्तु मम्मटस्य मतेन केवलं स्वेच्छया कृतमभ्यासो न, अपि तु काव्यज्ञस्य शिक्षामवलम्ब्य काव्यरचनायां पुनः पुनः प्रवृत्तिरभ्यासः। स स्ववृत्तौ कथयति—'काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पुनःपुनः प्रवृत्तिरिति'।[१९] अर्थात् ये काव्यं रचयितुं तस्य गुणदोषांश्च विवेचयितुं जानन्ति, तेषामुपदेशमनुसृत्य काव्यस्य करणे योजने च पुनः पुनः प्रवृत्तिरभ्यासः। अतः 'काव्यज्ञशिक्षया' सह अभ्यासस्य साक्षात् सम्बन्धोऽस्ति।

*काव्यप्रकाशदर्पणे* विश्वनाथः करणयोजनयोः स्वरूपं विशदयन् कथयति—'करणे काव्यस्वरूपनिष्पादने योजने पूर्वापराविरोधेन पदवाक्यविन्यासे'।[२०] अर्थात् करणशब्देन काव्यनिर्माणं, योजनशब्देन च पूर्वापराविरोधेन पदानां वाक्यानां च समुचितो विन्यासोऽभिप्रेतः। पुनः स आह—'उद्भवो निर्माणं वचनेति यावत्। समुल्लासः प्रबन्धावाप्तिः'।[२१] अतः अभ्यासस्य क्षेत्रं केवलं काव्यलेखनं न, अपि तु काव्यस्य सम्यक् निर्माणं पदवाक्यविन्यासश्च। अभ्यासेनैव काव्यस्य रचनाप्रक्रिया क्रमशः परिपक्वतां प्राप्नोति।

गोविन्दठक्कुरः *काव्यप्रदीपे* 'काव्यज्ञशिक्षा' इत्यस्य स्वरूपं निरूपयति—'काव्यज्ञशिक्षा काव्यं कर्तुं रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति तदुपदेशः'।[२२] अर्थात् ये काव्यं कर्तुं रसानुगुणतया प्रबन्धस्यावयवान् यथायोग्यं विन्यसितुं च जानन्ति, तेषामुपदेशः काव्यज्ञशिक्षा। ततः अभ्यासस्य स्वरूपमाह—'तया करणे योजने च पुनः पुनः प्रवृत्तिरभ्यासः'।[२३] अत्र तयाशब्देन काव्यज्ञशिक्षैव निर्दिश्यते। अतः शिक्षानुसारेण करणे योजने च पुनः पुनः प्रवृत्तिरभ्यासः। 'रसानुगुणतया' इति पदेन गोविन्दठक्कुरः अभ्यासस्य नान्दनिकपक्षमपि प्रकाशयति।

गोविन्दठक्कुरः पुनराह—'इतिशब्दो मिलितोपस्थापनाय। अन्यथा तद्वैयर्थ्यमेव स्यात्'।[२४] अनेन शक्तिनिपुणताभ्यासानां समन्वित-कारणत्वं सूचितम्। तदेव विशदयन् स दृष्टान्तमुदाहरति—'तथा च काव्यस्योद्भव उत्कृष्टोत्पत्तिः। तया कार्येण मिलितानामुपधानम्। दण्डचक्रादीनामिव घटेन'।[२५] अर्थात् यथा दण्डचक्रादीनां समन्वयेन घटस्योत्पत्तिर्भवति, तथैव शक्तिनिपुणताभ्यासानां समन्वयेन काव्यस्योत्कृष्टोत्पत्तिः। किन्तु केवलं मिलितत्वमात्रं कारणत्वमिति न मन्तव्यम्—'न तु मिलितत्वेन कारणैतैवेति भ्रमः कार्यः'।[२६] प्रत्येकस्य कारणस्य स्वकीयः व्यापारः अस्ति तथा परस्परापेक्षया ते काव्योत्पत्तौ सहायं कुर्वन्ति।

अतः मम्मटोक्तोऽभ्यासः काव्यज्ञशिक्षामनुसृत्य काव्यस्य करणे योजने च पुनः पुनः प्रवृत्तिः। विश्वनाथः तस्य करणयोजनात्मकं स्वरूपं विशदयति, गोविन्दठक्कुरश्च शिक्षानुसारी पुनरावृत्त्या सह रसानुगुणतां तथा शक्तिनिपुणताभ्यासानां समन्वितकारणत्वं प्रतिपादयति। फलतः अभ्यासः काव्यरचनायाः कौशलवर्धकः, रचनाप्रक्रियापरिष्कारकश्च महत्त्वपूर्णः कारणविशेष इति सिद्धम्।

**उपसंहारः**

परिशीलनेन ज्ञायते यत् मम्मटस्य काव्यकारणतत्त्वे 'शक्तिः', 'निपुणता' तथा 'अभ्यासः' इति त्रयाणां समन्वितोपस्थितिरेव काव्योत्पत्तेर्मूलकारणम्। 'शक्तिः' कवित्वबीजरूपः संस्कारविशेषः, 'निपुणता' लोकशास्त्रकाव्येतिहासादीनामवलोकनविमर्शनजन्या

व्युत्पत्तिः, 'अभ्यासश्च' काव्यज्ञशिक्षामनुसृत्य करणे योजने च पुनः पुनः प्रवृत्तिः। अत एव मम्मटः प्रतिपादयति—'त्रयः समुदिताः, न तु व्यस्ताः'; अर्थात् एतेषां समन्वयेनैव काव्योत्पत्तिः सम्भवति।

विश्वनाथगोविन्दठक्कुरौ मम्मटस्य मूलाभिप्रायमनुसरतः तयोर्व्याख्यानदृष्टौ भेदो दृश्यते। विश्वनाथः शक्तेः संस्कारात्मकं स्वरूपं, निपुणतायाः विस्तीर्णं ज्ञानक्षेत्रम्, अभ्यासस्य च करणयोजनसम्बन्धं विशदयति। गोविन्दठक्कुरस्तु शक्तिं 'कवित्वबीजभूतो... संस्कारविशेषः प्रतिभाव्यपदेशः' इति प्रतिभारूपेण निर्दिश्य तस्याः विशेषकारणत्वं प्रतिपादयति; निपुणतायां 'तेषां विमर्शनाद् व्युत्पत्तिर्निपुणता' इति विमर्शनजन्यव्युत्पत्तिं, अभ्यासे च 'तया करणे योजने च पुनः पुनः प्रवृत्तिरभ्यासः' इति शिक्षानुसारी पुनरावृत्तिं प्रकाशयति। 'दण्डचक्रादीनामिव घटेन' इति दृष्टान्तेन त्रयाणां समन्वितकारणत्वमपि सुस्पष्टं भवति।

अतः तुलनात्मकदृष्ट्या विश्वनाथस्य विवेचने शक्तेः संस्कारात्मकता, निपुणतायाः ज्ञानव्याप्तिः, अभ्यासस्य करणयोजनसम्बन्धश्च विशेषतया प्रकाशिताः; गोविन्दठक्कुरस्य विवेचने तु शक्तेः प्रतिभारूपता तथा कारणत्वं, निपुणतायाः विमर्शनजन्यव्युत्पत्तिः, अभ्यासस्य काव्यज्ञशिक्षया सह सम्बन्धश्च अधिकं स्पष्टतया प्रतिपादितः। फलतः दर्पणप्रदीपटीकयोः व्याख्याभ्यां मम्मटस्य संक्षिप्तं काव्यकारणतत्त्वं अधिकं सुस्पष्टं विश्लेषणीयञ्च स्वरूपं प्राप्नोति।

**उल्लेखपञ्जिः**

[१] भामहः, *काव्यालङ्कारः*, १/५।

[२] दण्डी, *काव्यादर्शः*, १/१०३।

[३] कवित्वबीजं प्रतिभानम्। कवित्वस्य बीजं कवित्वबीजम्। जन्मान्तरागतसंस्कारविशेषः कश्चित् यस्माद्विना काव्यं न निष्पद्यते, निष्पन्नं वा हास्यायतनं स्यात्। — वामनः, *काव्यालङ्कारसूत्रवृत्तिः*, १/३/१६।

[४] भामहः, *काव्यालङ्कारः*, १/५।

[५] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३।

[६] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३, वृत्तिभागः।

[७] तदेव।

[८] मम्मटाचार्यः, *काव्यप्रकाशः*, वामनाचार्यझलकीकरसम्पादितः, पृष्ठं ११।

[९] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३, वृत्तिभागः।

[१०] विश्वनाथः, *काव्यप्रकाशदर्पणम्*, पृष्ठं ४।

[११] तदेव।

[१२] गोविन्दठक्कुरः, *काव्यप्रदीपः*, पृष्ठं ६।

[१३] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३।

[१४] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३, वृत्तिभागः।

[१५] विश्वनाथः, *काव्यप्रकाशदर्पणम्*, पृष्ठं ५।

[१६] तदेव।

[१७] गोविन्दठक्कुरः, *काव्यप्रदीपः*, पृष्ठं ७।

[१८] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३।

[१९] मम्मटाचार्यः, *काव्यप्रकाशः*, १/३, वृत्तिभागः।

[२०] विश्वनाथः, *काव्यप्रकाशदर्पणम्*, पृष्ठं ५।

[२१] तदेव।

[२२] गोविन्दठक्कुरः, *काव्यप्रदीपः*, पृष्ठं ७।

[२३] तदेव।

[२४] तदेव।

[२५] तदेव।

[२६] तदेव।

**परिशीलितग्रन्थपञ्जिः**

गोविन्दठक्कुरः। *काव्यप्रदीपः*। सम्पादकौ दुर्गाप्रसादः, वासुदेवश्च लक्ष्मणः। बम्बई: निर्णयसागरप्रेसः, १९३३। तृतीयसंस्करणम्।

वामनः। *काव्यालङ्कारसूत्रवृत्तिः*। सम्पादकः अशोककुमारबन्द्योपाध्यायः। कोलकाता: सदेशः, २०१२। प्रथमसंस्करणस्य पुनर्मुद्रणम्। १४१५ बङ्गाब्दः (प्रथमसंस्करणम्)।

विश्वनाथः। *काव्यप्रकाशदर्पणम्*। सम्पादकः गोपराजुरामः। इलाहाबाद: मञ्जुप्रकाशनम्, १९७९। प्रथमसंस्करणम्।

भामहः। *काव्यालङ्कारः*। सम्पादकः पि. वि. नागनाथः। देहली: मोतीलालबनारसीदासपब्लिकेशन्स्, १९९१। द्वितीयसंस्करणस्य पुनर्मुद्रणम्। १९७०। द्वितीयसंस्करणम्।

मम्मटः। *काव्यप्रकाशः*। वामनाचार्यरामभट्टझलकीकरस्य 'बालबोधिनी' व्याख्यया सहितः। सम्पादकः रघुनाथदामोदरकार्मारकरः। पुणे: भाण्डारकर-ओरियण्टल्-रिसर्च्-इन्स्टिट्यूट्, १९६५।

मम्मटः। *काव्यप्रकाशः*। सम्पादकः रामसागरत्रिपाठी। देहली: मोतीलालबनारसीदासपब्लिकेशन्स्, १९९३। प्रथमसंस्करणम्।

रुद्रटः। *काव्यालङ्कारः*। नमिसाधुकृतया व्याख्यया सहितः। सम्पादकौ दुर्गाप्रसादः, वासुदेवश्च लक्ष्मणः। बम्बई: निर्णयसागरप्रेसः, १९२८। प्रथमसंस्करणम्।

राजशेखरः। *काव्यमीमांसा*। सम्पादकौ सि. डि. दालालः, आर्. एस्. शास्त्री च। के. एस्. रामास्वामिना संशोधितया व्याख्यया च सहितम्। पुणे: बडोदा-ओरियण्टल्-इन्स्टिट्यूट्, १९३४। तृतीयसंस्करणम्। १९१६। प्रथमसंस्करणम्।